# Baneshvara or Sansarapavana kavacha from Brahmavaivarta Purana

# બાણેશ્વર અથવા સંસારપાવનકવચં બ્રહ્મવૈવર્ત પુરાણાન્તર્ગતમ્

## Document Information


Text title : bANeshvara evaM sa.nsArapAvana kavachaM brahmavaivarta purANAntargatam

File name : bANeshvarakavachaBVP.itx

Category : kavacha, shiva

Location : doc_shiva

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : brahmavaivartapurANa brahmakhaNDaM adhyAya 19 shloka 39-54

Latest update : January 25, 2013

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

Baneshvara or Sansarapavana kavacha from Brahmavaivarta Purana

# બાણેશ્વર અથવા સંસારપાવનકવચં બ્રહ્મવૈવર્ત પુરાણાન્તર્ગતમ્

શિવસ્ય કવચં સ્તોત્રં શ્રૂયતામિતિ શૌનક ।
વસિષ્ઠેન ચ યદ્દત્તં ગન્ધર્વાય ચ યો મનુઃ ॥ ૩૯॥

ઓં નમો ભગવતે શિવાય સ્વાહેતિ ચ મનુઃ ।
દત્તો વસિષ્ઠેન પુરા પુષ્કરે કૃપયા વિભો ॥ ૪૦॥

અયં મન્ત્રો રાવણાય પ્રદત્તો બ્રહ્મણા પુરા ।
સ્વયં શમ્ભુશ્ચ બાણાય તથા દુર્વાસસે પુરા ॥ ૪૧॥

મૂલેન સર્વં દેયં ચ નૈવેદ્યાદિકમુત્તમમ્ ।
ધ્યાયેન્નિત્યાધિકં ધ્યાનં વેદોક્તં સર્વસમ્મતમ્ ॥ ૪૨॥

ૐ નમો મહાદેવાય ।

બાણ ઉવાચ ।
મહેશ્વર મહાભાગ કવચં યત્ પ્રકાશિતમ્ ।
સંસારપાવનં નામ કૃપયા કથય પ્રભો ॥ ૪૩॥

મહેશ્વર ઉવાચ ।
શ‍ૃણુ વક્ષ્યામિ હે વત્સ કવચં પરમાદ્ભુતમ્ ।
અહં તુભ્યં પ્રદાસ્યામિ ગોપનીયં સુદુર્લભમ્ ॥ ૪૪॥

પુરા દુર્વાસસે દત્તં ત્રૈલોક્યવિજયાય ચ ।
મમૈવેદં ચ કવચં ભક્ત્યા યો ધારયેત્ સુધીઃ ॥ ૪૫॥

જેતું શક્નોતિ ત્રૈલોક્યં ભગવન્નવલીલયા ।
સંસારપાવનસ્યાસ્ય કવચસ્ય પ્રજાપતિઃ ॥ ૪૬॥

ઋષિશ્છન્દશ્ચ ગાયત્રી દેવોઽહં ચ મહેશ્વરઃ ।
ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૪૭॥

પઞ્ચલક્ષજપેનૈવ સિદ્ધિદં કવચં ભવેત્ ।

યો ભવેત્ સિદ્ધકવચો મમ તુલ્યો ભવેદ્ભુવિ ।
તેજસા સિદ્ધિયોગેન તપસા વિક્રમેણ ચ ॥ ૪૮॥

શમ્ભુર્મે મસ્તકં પાતુ મુખં પાતુ મહેશ્વરઃ ।
દન્તપંક્તિં નીલકણ્ઠોઽપ્યધરોષ્ઠં હરઃ સ્વયમ્ ॥ ૪૯॥

કણ્ઠં પાતુ ચન્દ્રચૂડઃ સ્કન્ધૌ વૃષભવાહનઃ ।
વક્ષઃસ્થલં નીલકણ્ઠઃ પાતુ પૃષ્ઠં દિગમ્બરઃ ॥ ૫૦॥

સર્વાઙ્ગં પાતુ વિશ્વેશઃ સર્વદિક્ષુ ચ સર્વદા ।
સ્વપ્ને જાગરણે ચૈવ સ્થાણુર્મે પાતુ સન્તતમ્ ॥ ૫૧॥

ઇતિ તે કથિતં બાણ કવચં પરમાદ્ભુતમ્ ।
યસ્મૈ કસ્મૈ ન દાતવ્યં ગોપનીયં પ્રયત્નતઃ ॥ ૫૨॥

યત્ ફલં સર્વતીર્થાનાં સ્નાનેન લભતે નરઃ ।
તત્ ફલં લભતે નૂનં કવચસ્યૈવ ધારણાત્ ॥ ૫૩॥

ઇદં કવચમજ્ઞાત્વા ભજેન્માં યઃ સુમન્દધીઃ ।
શતલક્ષપ્રજપ્તોઽપિ ન મન્ત્રઃ સિદ્ધિદાયકઃ ॥ ૫૪॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે શઙ્કરકવચં સમાપ્તમ્ ।

brahmavaivartapurANa brahmakhaNDaM adhyAya 19 shloka 39-54

Encoded and proofread by
PSA Easwaran

---

*Baneshvara or Sansarapavana kavacha from Brahmavaivarta Purana*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*